श्रियंमन्या, स्त्री, आत्मानं श्रियं मन्यते या । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ५।७१ ।
"मिथ्यैव श्रीः श्रियंमन्या श्रीमन्मन्यो न्वधा-हरिः ॥")

श्रिष, उ दाहे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) क्वावेट् ।) उ, श्रेषित्वा श्लिष्ट्वा । इति दुर्गादासः ॥

श्री, ञ ग पाके । इति कविकल्पद्रुमः ॥ [क्र्या०-उभ०-सक०-सेट् ।) ञ ग श्रीणाति श्रीणीते । इति दुर्गादासः ॥

श्रीः, स्त्री, (श्रयतीति । श्रि + "क्विप्‌वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घश्च ।) लक्ष्मीः । (यथा, विष्णुपुराणे । १ । ८ । १३ ।
"श्रियश्च देवदेवस्य पत्नी नारायणस्य च या ॥")
लवङ्गम् । इत्यमरः ॥ वेशरचना । शोभा । (यथा, रामायणे । २ । ८४ । १० ।
गजमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥")
सरस्वती । सरलद्रुमः । त्रिवर्गः । सम्पत्तिः । (यथा,—
"न दातुं नोपभोक्तुं वा शक्नोति कृपणः श्रियम् ॥")
विधा । उपकरणम् । विभूतिः । मतिः । इति मेदिनी ॥ अधिकारः । प्रभा । कीर्त्तिः । इति धरणिः ॥ वृद्धिः । सिद्धिः । इति शब्दरत्नावली ॥ वृत्तार्हन्माता । इति हेमचन्द्रः ॥ कमलम् । बिल्ववृक्षः । वृद्धिनामौषधम् । इति राजनिर्घण्टः ॥ * ॥ देवादिनाम्नः पूर्व्वं श्रीशब्दप्रयोगः कर्त्तव्यः । यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् ।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥"
इति राघवभट्टधृतप्रयोगसारदर्शनात् स्वर्गगामित्वादिना सिद्धोऽधिकारो येषां नराणां इत्यनेन जीवतां श्रीशब्दादित्वं नाम्नः । न तु मृतानां तथेति शिष्टाचारः । इति संस्कारतत्त्वम् ॥ * ॥ पत्रपृष्ठे श्रीशब्ददानप्रमाणं पत्रशब्दे द्रष्टव्यम् ॥ (एकाक्षरच्छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् । "ग् श्रीः ।" उदाहरणम् । "श्रीस्ता । मास्ताम् ॥")

श्रीः, पुं, (श्रि + क्विप् दीर्घश्च ।) रागविशेषः । स तु हनुमन्मते षड्‌रागान्तर्गतपञ्चमरागः । पृथिव्या नाभितो निर्गतः । अस्य जातिः सम्पूर्णा । तस्य स्वरावलिः । प ऋ ग म प ध नि अस्य ग्रहः षड्‌जस्वरः । हेमन्तर्त्तौ अपराह्णे गानसमयः । रागमालायां अस्याकारः । सुन्दरपुरुषः । शुक्लवस्त्रपरीधानः । मतान्तरे रक्तवस्त्रपरीधानः । स्फाटिकपद्मरागमणिमालागलः । पद्मपुष्पहस्तः । विचित्रसिंहासनारूढः । अस्य संमुखे गायन्ति गायकाः ॥ हनुमन्मते अस्य भार्य्याः पञ्च । यथा । प्रथमा मालश्रीः । [तस्याः सम्पूर्णजातिः । अस्याः स्वरावलिः । ष ऋ ग म प ध नि । अस्या ग्रहः षड्‌जस्वरः । हिमर्त्तौ द्वितीयप्रहरदिवसे गानसमयः । रागमालायां तस्याः स्वरूपम् । रक्तवर्णा स्त्री । कोमलाङ्गी । पीतवस्त्रपरीधाना । कौतुकादभ्रमन्ती सती नायकादभिन्ना सखीगणेन सह हास्ययुक्ताम्रतरुतलोपविष्टा ॥ १ ॥ द्वितीया मारवा अथवा मालवा । अस्याः षाड़वजातिः । अस्याः स्वरावलिः । ष प ग म ध नि । अस्या ग्रहः षड्‌जस्वरः । हिमर्त्तौ शेषवेलायां गानसमयः । रागमालायां तस्याः स्वरूपं यथा । स्वर्णवस्त्रपरीधाना । पुष्पमाल्यधरा । नायकमिलनार्थमेकाकिनीसङ्केतस्थानोपविष्टा ॥२॥ तृतीया धनाश्रीः । अस्याः षाड़वजातिः । अस्याः स्वरावलिः । ष प ध नि ऋ ग । ग्रहः षड्‌जस्वरः । हिमर्त्तौ द्वितीयप्रहरदिवसे शेषवेलायां वा गानसमयः । रागमालायां तस्याः स्वरूपम् । वियोगिनी नारी । रक्तवस्त्रपरीधाना । वियोगजसन्तापेन दुःखितातिकृशा । एकाकिनी रोरुद्यमाना बकुलतरुतलोपविष्टा ॥ ३ ॥ चतुर्थी वसन्तरागिणी । अस्याः सम्पूर्णा जातिः । अस्याः स्वरावलिः । ष ऋ ग म प ध नि । अस्या ग्रहः षड्‌जस्वरः । हिमर्त्तौ मध्याह्ने वसन्तर्त्तौ दिवा रात्रौ च गानसमयः । रागमालायां तस्याः स्वरूपम् । सुन्दरपुरुषाकृतिः । कस्यचिन्मते श्यामवर्णा । रक्तवसना । मयूरपुच्छशिखा । आम्रमुकुलहस्ता । यौवनमदनमदमत्ता । पुष्पमाल्यगलदेशा । पुष्पोद्याने सह नर्त्तकीसुस्वरगायनीभिः सुखेन रागरङ्गयुता । वामहस्तधृततताम्बूलवीटिका । स्त्रीगणसहितहास्यकौतुकक्रीड़ानृत्यगीतवाद्यासक्ता । रागमालान्तरे उक्तगुणयुक्ता श्रीकृष्णमूर्त्तिसदृशमूर्त्तिर्लिखिता ॥४॥ पञ्चमी आशावरी । अस्या औड़वजातिः । अस्याः स्वरावलिः । ध नि ष म प । अस्याः ग्रहः धैवतस्वरः । हिमर्त्तौ द्वितीयप्रहरदिवसे गानसमयः । रागमालायां अस्याः स्वरूपम् । श्यामवर्णा स्त्री । कोमलाङ्गी । श्वेतशाटीपरिधाना । कर्पूरानुलेपना । हस्तपदयोर्बृहत्सर्पवेष्टिता कृशिवद्धचूड़ा । जलमध्यस्थपर्वतगुहायामुपविष्टा । रागमालान्तरे उक्तगुणयुक्ता वृचपत्रवद्धकटिदेशा नग्ना लिखिता ॥५ ॥ * ॥ अस्य पुत्त्रा अष्टौ । यथा । सिन्धुः १ मालवः २ गौड़ः अथवा गोण्डः ३ अस्य स्थाने केचित् कल्याणः इति केचिच्च हाम्मीर इति पठन्ति । गुणसागरः ४ कुम्भः ५ गम्भीरः ६ शङ्करः अथवा आगड़ः ७ विहागरः ८ ॥ * ॥ कल्लिनाथमते श्रीरागः प्रथमरागः अस्य भार्य्याः षट् । यथा । गौरी १ कोलाहली २ धवली ३ रुद्राणी ४ मालकौश अर्थात् कौशिकी ५ देवगान्धारी ६ । तन्मते पुत्त्रा अष्टौ हनुमन्मततुल्याः । किन्तु गौड़शङ्करविहागरस्थाने कल्याण आगड़ा विगड़ा लिखिताः ॥ * ॥ सोमेश्वरमतेऽपि प्रथमरागोऽयम् । अस्य रागिण्यः षट् । यथा । मालवी अथवा मरवा १ त्रिवेणी अथवा तिरवनी २ गौरी ३ केदारा ४ मधुमाधवी ५ पाहाड़िका अथवा पाहाड़ी ६ । अस्य पुत्त्राः पूर्व्वोक्तमतद्वयतुल्याः । तन्मते अस्य रागस्य रागिणीसहितस्य शिशिरर्त्तौ गानसमयः ॥ * ॥ भरतमते पञ्चमरागोऽयम् । अस्य रागिण्यः पञ्च । यथा । सिन्धुवी १ । काफी २ ठुमरी ३ पूर्व्वदेशे विस्तार इति ख्याता । विचित्रा ४ शिरहटी अथवा सोरहठी ५ तन्मते अस्याष्ट पुत्त्राः यथा । श्रीरमणः १ कोलाहलः २ सामन्तः ३ शङ्करणः ४ रागेश्वरः ५ खटरागः ६ वड़हंसः ७ देशकारः ८ । तेषां भार्य्या यथा । विद्या १ धात्या २ कुम्भा ३ मुहनी ४ शरदा ५ क्षेमा ६ शशरेखा ७ सरस्वती ८ । इति नानासङ्गीतशास्त्रतः संगृहीतम् ॥

श्रीकण्ठः, पुं, (श्रीः शोभा कण्ठे यस्य ।) शिवः । इत्यमरः ॥ कुरुजाङ्गलदेशः । स तु हस्तिनापुरस्य उत्तरपश्चिमे वर्त्तते । इति हेमचन्द्रः ॥ (पक्षिविशेषः । यथा, बृहत्संहितायाम् । ८६ । ३८ ।
"स्त्रीसंज्ञा भासभषककपिश्रीकर्णछिक्कराः ।
शिखिश्रीकण्ठपिप्पीकरुरुश्येनाश्च दक्षिणाः ॥")

श्रीकण्ठपदलाञ्छनः, पुं, (श्रीकण्ठ इतिपदं लाञ्छनं यस्य ।) भवभूतिः । स तु मालतीमाधवादिनाटककर्त्ता । इति शब्दमाला ॥ (यथा, उत्तरचरिते प्रस्तावनायाम् ।
"अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम ॥")

श्रीकण्ठसखः, पुं, (श्रीकण्ठस्य महादेवस्य सखा । समासे टच् ।) कुबेरः । इति हलायुधः ॥

श्रीकन्दा, स्त्री, (श्रीः शोभा तद्युक्तः कन्दो यस्याः ।) बन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

श्रीकरं, क्ली, रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥

श्रीकरः, पुं, विष्णुः । इति त्रिकाण्डशेषः ॥ स्मृतिग्रन्थकारविशेषः । यथा । श्रीकराचार्य्यादिग्रन्थादरपराहतविवेकानाम् । इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः ॥(श्रियः शोभायाः करः) । श्रीकारके, त्रि ॥

श्रीकरणं, क्ली, (श्रीः क्रियतेऽनेनेति । कृ + करणे ल्युट् ।)लेखनी । इति शब्दरत्नावली ॥

श्रीकान्तः, पुं, (श्रियाः कान्तः ।) विष्णुः । इति शब्दरत्नावली ॥

श्रीकारी, [न्] पुं,(श्रियं शोभां करोतीति । कृ + णिनिः ।) मृगविशेषः । तत्पर्य्यायः । शिखियूपः २ कुरङ्गः ३ महाशयः ४ यवनः ५ वेगिहरिणः ६ जङ्घालः ७ जाङ्घिकाह्वयः ८ । अस्य मांसगुणाः । लघुत्वम् । हृद्यत्वम् । बलप्रदत्वञ्च इति राजनिर्घण्टः ॥

श्रीखण्डः, पुं, क्ली, (श्रियः शोभायाः खण्ड इव यत्र ।) चन्दनम् । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । ८ । १० ।